# ॥ मन्किगीता ॥

## १७१

युधिस्थिर

ईहमानः समारम्भान्यदि नासादयेद्धनम् ।
धनतृष्णाभिभूतश्च किं कुर्वन्सुखमाप्नुयात् ॥१॥

भीस्म

सर्वसाम्यमनायासः सत्यवाक्यं च भारत ।
निर्वेदश्चाविवित्सा च यस्य स्यात्स सुखी नरः ॥२॥

एतान्येव पदान्याहुः पञ्च वृद्धाः प्रशान्तये ।
एष स्वर्गश्च धर्मश्च सुखं चानुत्तमं सताम् ॥३॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निर्वेदान्मङ्किना गीतं तन्निबोध युधिष्ठिर ॥४॥

ईहमानो धनं मङ्किर्भग्नेहश्च पुनः पुनः ।
केन चिद्धनशेषेण क्रीतवान्दम्य गोयुगम् ॥५॥

सुसम्बद्धौ तु तौ दम्यौ दमनायाभिनिःसृतौ ।
आसीनमुष्ट्रं मध्येन सहसैवाभ्यधावताम् ॥६॥

तयोः सम्प्राप्तयोरुष्ट्रः स्कन्धदेशममर्षणः ।
उत्थायोत्क्षिप्य तौ दम्यौ प्रससार महाजवः ॥७॥

ह्रियमाणौ तु तौ दम्यौ तेनोष्ट्रेण प्रमाथिना ।
म्रियमाणौ च सम्प्रेक्ष्य मङ्किस्तत्राब्रवीदिदम् ॥८॥

न चैवाविहितं शक्यं दक्षेणापीहितुं धनम् ।
युक्तेन श्रद्धया सम्यगीहां समनुतिष्ठता ॥९॥

कृतस्य पूर्वं चानर्थैर्युक्तस्याप्यनुतिष्ठतः ।
इमं पश्यत सङ्गत्या मम दैवमुपप्लवम् ॥१०॥

उद्यम्योद्यम्य मे दम्यौ विषमेनेव गच्छति ।
उत्क्षिप्य काकतालीयमुन्माथेनेव जम्बुकः ॥११॥

मनी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ।
शुद्धं हि दैवमेवेदमतो नैवास्ति पौरुषम् ॥१२॥

यदि वाप्युपपद्येत पौरुषं नाम कर्हि चित् ।
अन्विष्यमाणं तदपि दैवमेवावतिष्ठते ॥१३॥

तस्मान्निर्वेद एवेह गन्तव्यः सुखमीप्सता ।
सुखं स्वपिति निर्विण्णो निराशश्चार्थसाधने ॥१४॥

अहो सम्यक्शुकेनोक्तं सर्वतः परिमुच्यता ।
प्रतिष्ठता महारण्यं जनकस्य निवेशनात् ॥१५॥

यः कामान्प्राप्नुयात्सर्वान्यश्चैनान्केवलांस्त्यजेत् ।
प्रापनात्सर्वकामानां परित्यागो विशिष्यते ॥१६॥

नान्तं सर्वविवित्सानां गतपूर्वोऽस्ति कश् चन ।
शरीरे जीविते चैव तृष्णा मन्दस्य वर्धते ॥१७॥

निवर्तस्व विवित्साभ्यः शाम्य निर्विद्य मामक ।
असकृच्चासि निकृतो न च निर्विद्यसे तनो ॥१८॥

यदि नाहं विनाश्यस्ते यद्येवं रमसे मया ।
मा मां योजय लोभेन वृथा त्वं वित्तकामुक ॥१९॥

सञ्चितं सञ्चितं द्रव्यं नष्टं तव पुनः पुनः ।
कदा विमोक्ष्यसे मूढ धनेहां धनकामुक ॥२०॥

अहो नु मम बालिश्यं योऽहं क्रीदनकस्तव ।
किं नैव जातु पुरुषः परेषां प्रेष्यतामियात् ॥२१॥

न पूर्वे नापरे जातु कामानामन्तमाप्नुवन् ।
त्यक्त्वा सर्वसमारम्भान्प्रतिबुद्धोऽस्मि जागृमि ॥२२॥

नूनं ते हृदयं कामवज्र सारमयं दृधम् ।
यदनर्थशताविष्टं शतधा न विदीर्यते ॥२३॥

त्यजामि कामत्वां चैव यच्च किं चित्प्रियं तव ।
तवाहं सुखमन्विच्छन्नात्मन्युपलभे सुखम् ॥२४॥

कामजानामि ते मूलं सङ्कल्पात्किल जायसे ।
न त्वां सङ्कल्पयिष्यामि समूलो न भविष्यति ॥२५॥

ईहा धनस्य न सुखा लब्ध्वा चिन्ता च भूयसी ।
लब्धानाशो यथा मृत्युर्लब्धं भवति वा न वा ॥२६॥

परेत्य यो न लभते ततो दुःखतरं नु किम् ।

न च तुष्यति लब्धेन भूय एव च मार्गति ॥ २७॥

अनुतर्षुल एवार्थः स्वादु गाङ्गमिवोदकम् ।
मद्विलापनमेतत्तु प्रतिबुद्धोऽस्मि सन्त्यज ॥ २८॥

य इमं मामकं देहं भूतग्रामः समाश्रितः ।
स यात्वितो यथाकामं वसतां वा यथासुखम् ॥ २९॥

न युष्मास्विह मे प्रीतिः कामलोभानुसारिषु ।
तस्मादुत्सृज्य सर्वान्वः सत्यमेवाश्रयाम्यहम् ॥ ३०॥

सर्वभूतान्यहं देहे पश्यन्मनसि चात्मनः ।
योगे बुद्धिं श्रुते सत्त्वं मनो ब्रह्मणि धारयन् ॥ ३१॥

विहरिष्याम्यनासक्तः सुखी लोकान्निरामयः ।
यथा मा त्वं पुनर्नैवं दुःखेषु प्रनिधास्यसि ॥ ३२॥

त्वया हि मे प्रनुन्नस्य गतिरन्या न विद्यते ।
तृष्णा शोकश्रमाणां हि त्वं कामप्रभवः सदा ॥ ३३॥

धननाशोऽधिकं दुःखं मन्ये सर्वमहत्तरम् ।
ज्ञातयो ह्यवमन्यन्ते मित्राणि च धनच्युतम् ॥ ३४॥

अवज्ञान सहस्रैस्तु दोषाः कस्ततराधने ।
धने सुखकला या च सापि दुःखैर्विधीयते ॥ ३५॥

धनमस्येति पुरुषं पुरा निघ्नन्ति दस्यवः ।
क्लिश्यन्ति विविधैर्दन्दैर्नित्यमुद्वेजयन्ति च ॥ ३६॥

मन्दलोलुपता दुःखमिति बुद्धिं चिरान्मया ।
यद्यदालम्बसे कामतत्तदेवानुरुध्यसे ॥ ३७॥

अतत्त्वज्ञोऽसि बालश्च दुस्तोषोऽपूरणोऽनलः ।
नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभम् ॥ ३८॥

पातालमिव दुष्पूरो मां दुःखैर्योक्तुमिच्छसि ।
नाहमद्य समावेष्टुं शक्यः कामपुनस्त्वया ॥ ३९॥

निर्वेदमहमासाद्य द्रव्यनाशाद्यदृच्छया ।
निर्वृतिं परमां प्राप्य नाद्य कामान्विचिन्तये ॥ ४०॥

अतिक्लेशान्सहामीह नाहं बुध्याम्यबुद्धिमान् ।
निकृतो धननाशेन शये सर्वाङ्गविज्वरः ॥ ४१॥

परित्यजामि कामत्वां हित्वा सर्वमनोगतीः ।
न त्वं मया पुनः कामनस्योतेनेव रंस्यसे ॥ ४२॥

क्षमिष्येऽक्षममाणानां न हिंसिष्ये च हिंसितः ।
द्वेष्य मुक्तः प्रियं वक्ष्याम्यनादृत्य तदप्रियम् ॥ ४३॥

तृप्तः स्वस्थेन्द्रियो नित्यं यथा लब्धेन वर्तयन् ।
न सकामं करिष्यामि त्वामहं शत्रुमात्मनः ॥ ४४॥

निर्वेदं निर्वृतिं तृप्तिं शान्तिं सत्यं दमं क्षमाम् ।
सर्वभूतदयां चैव विद्धि मां शरणागतम् ॥ ४५॥

तस्मात्कामश्च लोभश्च तृष्णा कार्पण्यमेव च ।
त्यजन्तु मां प्रतिष्ठन्तं सत्त्वस्थो ह्यस्मि साम्प्रतम् ॥ ४६॥

प्रहाय कामं लोभं च क्रोधं पारुष्यमेव च ।
नाद्य लोभवशं प्राप्तो दुःखं प्राप्स्याम्यनात्मवान् ॥ ४७॥

यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते ।
कामस्य वशगो नित्यं दुःखमेव प्रपद्यते ॥ ४८॥

कामान्व्युदस्य धुनुते यत्किं चित्पुरुषो रजः ।
कामक्रोधोद्भवं दुःखमह्रीररतिरेव च ॥ ४९॥

एष ब्रह्म प्रविष्टोऽहं ग्रीस्मे शीतमिव ह्रदम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ॥ ५०॥

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णा क्षयसुखस्यैते नार्हतः सोदशीं कलाम् ॥ ५१॥

आत्मना सप्तमं कामं हत्वा शत्रुमिवोत्तमम् ।
प्राप्यावध्यं ब्रह्म पुरं राजेव स्यामहं सुखी ॥ ५२॥

एतां बुद्धिं समास्थाय मङ्किर्निर्वेदमागतः ।
सर्वान्कामान्परित्यज्य प्राप्य ब्रह्म महत्सुखम् ॥ ५३॥

दम्य नाश कृते मङ्किरमरत्वं किलागमत् ।
अछिनत्काममूलं स तेन प्राप महत्सुखम् ॥ ५४॥

॥ इति मन्किगीता समाप्ता ॥

Please send corrections to Sunder Hattangadi(sunderh@hot(ail.co();

Last updated June 22, 1998